**संस्कृत वार्ता:**

**दिनाङ्क : 07/07/2026**

**सायम : 06:20**

## आदौ मुख्यवार्ता:

1. वैश्विक-शान्ति-स्थिरतायै भारत-इण्डोनेशियादेशयोः रणनीतिक-संधिसुदृढीकरणाय प्रधानमन्त्रिणः नरेन्द्रमोदिनः आह्वानम्; जकार्तायां इण्डोनेशियासंसदः संयुक्त-सत्रं सम्बोधितवान्।
2. भारत-इण्डोनेशियादेशयोः मध्ये महत्वपूर्ण-खनिज, नवोन्मेषी-प्रौद्योगिकी, कृषि अथ सामुद्रिक-सुरक्षा इत्यादिषु विविधविषयेषु प्रमुख संधिपत्राणि परस्परं विनिमयिकृतानि।
3. प्रधानमन्त्री नरेन्द्रमोदी जकार्ता-नगरे इण्डोनेशिया-देशस्य सर्वोच्च-नागरिक-सम्मानेन 'बिन्तङ्ग आदिपूर्ण' इत्युपाधिना समलङ्कृतः।
4. केरल-राज्यस्य वायनाड-जनपदे एकस्मिन् सुरङ्ग-मार्ग-निर्माणस्थले सञ्जातेन दारुण-पङ्कपातेन त्रयः जनाः पंचत्वे विलीनाः।
5. भारतीय-ऋतु-विज्ञान-विभागस्य पूर्वसूचनानुगुणं आगामिषु त्रिषु दिनेषु देशस्य विभिन्नेषु प्रान्तेषु विशेषतः गुजरात, हरियाणा, पञ्जाब अथ राजस्थानक्षेत्रेषु प्रावृट् स्थितिः सर्वथा अनुकूला वर्तते ।
6. पुरुष-क्रिकेट-प्रतिस्पर्धायां अन्ताराष्ट्रिय-शृङ्खलायाः तृतीये द्वन्द्वे भारतं अद्य रात्रौ नॉटिंघम-नगरस्य 'ट्रेंट ब्रिज' इत्यत्र इङ्गलैण्ड-दलेन सह स्पर्धिष्यते।

## पीएम-इण्डोनेशिया एमओयू HL-1, 2 और 3

प्रधानमन्त्रिणा नरेन्द्रमोदिना जकार्तानगरे इण्डोनेशिया-देशस्य राष्ट्रपतिना प्रबोवो सुबियान्तो इत्यनेन सह द्विपक्षीयसम्बन्धं सुदृढं कर्तुं सहैव द्वयोः देशयोः व्यापक-रणनीतिकसंधेः कृते नूतनऊर्जां प्रदातुं प्रतिनिधिमण्डल-स्तरीयं विचारविनीनमयम् अकारि। द्वयोः राजनेत्रोः समुपस्थितौ रक्षा, महत्वपूर्ण-खनिज-कृषि-सामुद्रिक-सहयोग-नवोन्मेषी-प्रौद्योगिकीत्यादिषु विविध-क्षेत्रेषु अनेकानि संधि-पत्राणि हस्ताक्षरीकृतानि।

उभाभ्यां नेतृभ्याम् जकार्ता-नगरे भारतीय-प्रबन्ध-संस्थान-बेंगलूरु इत्यस्य एकां नूतनां शाखां संस्थापयितुं सहमतिः च व्यक्तीकृता। सम्भाषणावधौ उभाभ्यां भारत–इण्डोनेशिया – व्यापक – रणनीतिक – संधि सुदृढीकरणाय स्वकीया प्रतिबद्धता पुनः संशोधिता।

जकार्ता-नगरे राष्ट्रपतिना प्रबोवो इत्यने सह संयुक्त-वार्ताहरसम्मेलनं सम्बोधयन् प्रधानमन्त्री मोदी प्रावोचत् यत् परस्परं वर्धमानेन विश्वासेन रक्षा, सुरक्षा तथा सामुद्रिक-क्षेत्रेषु अस्मदीय पारस्परिक-सहयोगः सुदृढः जातः अस्ति।

इण्डोनेशिया-देशस्य सर्वोच्च-नागरिक-सम्मानेन 'बिन्तङ्ग आदिपूर्ण' इति उपाधिना अलङ्कृतः प्रधानमन्त्री नरेन्द्रमोदी अस्य गौरवपूर्णक्षणस्य कृते इण्डोनेशिया-सर्वकारं प्रति स्वकीयां गभीरां कृतज्ञतां प्राकटयत्।

तेन अयं प्रतिष्ठित-पुरस्कारः भारतस्य सार्धशतकोटि-जनेभ्यः समर्पितः।

इतः प्राक्, प्रधानमन्त्री नरेन्द्रमोदी इण्डोनेशिया-देशस्य राष्ट्रपति-प्रासादे 'इस्ताना मेरदेका' इत्यत्र औपचारिक-राजकीय-सम्माननं प्राप्तवान् ।

अद्य अपराह्णे प्रधानमन्त्री नरेन्द्रमोदी जकार्ता-नगरे इण्डोनेशिया-संसदः संयुक्त-सत्रं सम्बोधितवान्। प्रधानमन्त्री सविशेषं न्यगादीत् यत् वैश्विक-आतङ्कवादस्य प्रतिकाराय उभे अपि राष्ट्रे 'संयुक्त-कार्यसमूह' तन्त्रस्य माध्यमेन अत्यन्तं निकटतया कार्यं कुरुतः।

**<u>केरलम-भू-स्खलन HL-4</u>**

केरल-राज्यस्य वायनाड-जनपदे मेप्पाडी-समीपस्थे 'कल्लाडी' स्थानके अद्य वायनाड-सुरङ्ग-मार्ग-परियोजनायाः निर्माणस्थले सञ्जातेन एकेन भीषणेन प्राणहारकपङ्कपातेन त्रयः जनाः मृत्युमुपगाः ।

वार्ताहरैः सह भाषमाणः मुख्यमन्त्री वी. डी. सतीशनः इमां घटनाम् अत्यन्तं कष्टप्रदां दूर्भाग्यास्पदां च अवर्णयत्। तेन आरोपः कृतः यत् "जनपद-आपद्-प्रबन्धन-प्राधिकरणस्य समाह्वानानां पश्चाद् अपि अधिकारिभिः दत्तानां निरन्तर-निर्देशानां पालने गम्भीरा उपेक्षा विहिता। तेन अग्रे ज्ञापितं यत् दुर्घटना-स्थले साहाय्य-उद्धार-कार्यार्थं राष्ट्रिय-आपद्-उद्धार-बलस्य दलानि, राज्य-आरक्षक-बलं सहैव अग्निशमन-उद्धार-सेवा-विभागः सद्यः नियोजिताः सन्ति।

**राष्ट्रपतिः**

अद्य राष्ट्रपतिपदासीना द्रौपदी मुर्मु नवदिल्ल्याम् अस्य वर्षस्य डुरण्ड्-कप्-टूर्नामेण्ट् इत्यस्य जयचिह्नानाम् अनावरणम् अकरोत् सहैव ध्वजं प्रदर्श्य तान् प्रेषितवती। सभां सम्बोधयन्ती असौ अवदत् यत् अस्मिन् वर्षे नूतनानि दलानि डुरण्ड्-कप्, प्रेसिडेण्ट्स्-कप्, शिम्ला-ट्रोफी इत्येतेभ्यः जयचिह्नेभ्यः प्रतिस्पर्धां करिष्यन्ति।

**शाह-70 लाख पौधा**

केन्द्रीय-गृहमन्त्री अमितशाहः अद्य राष्ट्रियराजधान्याः हरित-क्षेत्रस्य संवर्धनाय 'एक पेड मां के नाम' इत्यभियानमभिलक्ष्य दिल्ल्यां सप्तति-लक्ष पादपानां वपनस्य कस्यचित् महाभियानस्य विधिवत् शुभारम्भं विहितवान्।

अस्मिन् मङ्गलावसरे सम्बोधयन् श्रीशाहः प्रतिपादितवान् यत् अयं वपन-सङ्कल्पः दिल्लीपर्यावरणस्य पर्यावरण-तन्त्रस्य च आमूलं-परिवर्तनाय कश्चन अत्यन्तं महत्त्वपूर्णः अभिनव-प्रयासो वर्तते। गृहमान्त्रिणा सविशेषं सबलं च प्रोदीरितं यत् प्रशासनं पावन-यमुनानद्याः प्रदुषण-मुक्तये, स्वच्छतायै च अविरतं दृढतापूर्वकं कार्यं करोति।

**जनजातीय-मन्त्रालयः**

केन्द्रीय-जनजातीय-कार्यमन्त्रालयेन जूएल् ओरम् इत्यनेन जनजातीय-विकासाय ज्ञानस्य, नवान्वेषणस्य, साक्ष्याधारित-नीति-निर्माणस्य च यन्त्ररूपेण जनजातीय-अनुसन्धान-संस्थानां सुदृढीकरणाय नूतनदृष्टिः उद्घाटिता अस्ति। अद्य भुवनेश्वरे राष्ट्रियकार्यशालायाः उद्घाटनं कुर्वन् मन्त्री जनजातीय-रिक्थस्य संरक्षणाय, सर्वसमावेशिविकासाय, अत्याधुनिकप्रौद्योगिकीभिः सह स्वदेशिज्ञानस्य एकीकरणाय च आह्वानम् अकरोत्।

**केन्द्रीयकृषिमन्त्री**

केन्द्रीयकृषिमन्त्री शिवराजसिंह चौहानः अद्य विंशति सहस्राधिक कृषि उद्यमिनः विंशति लक्ष कृषकान् सशक्तीकर्तुं प्रगति-परियोजनायाः शुभारम्भम् अकरोत्। नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन्, श्रीचौहानः विकसितभारतस्य सङ्कल्पं साधयितुं तथा कृषिक्षेत्रस्य, समृद्धग्रामाणां, समृद्धकृषकानां च विकासस्य

आवश्यकतायै बलं प्रदत्तवान्। कृषि-मन्त्री अवदत् यत् प्रगति-कार्यक्रमस्य अन्तर्गतं षड्विंशति-सहस्र-लघु-कृषि-उद्यमिनः प्रशिक्षयितुं प्रशासनेन निर्णयः कृतः अस्ति इति। सः अवदत् यत् एते उद्यमिनः ग्रामे एव कार्यं कुर्वन्ति, ग्रामकृषिं परिवर्तयितुं शत-द्विशत-कृषकैः सह सहयोगं कुर्वन्ति इति।

**निर्वाचन आयोग**

निर्वाचनायोगेन बिहार-गुजरात-मध्यप्रदेश-राज्यानां त्रिविधान-सभासनानाम् उपनिर्वाचनेभ्यः अधिसूचना प्रख्यापिता। बिहारे बाङ्कीपुरस्य गुजराते मन्जलपुरस्य मध्यप्रदेशे दतिया इत्येतस्य विधानसभासनेषु उपनिर्वाचनं भविष्यति। नामाङ्कनपत्रं जुलाईमासस्य त्रयोदशदिनाङ्कं यावत् प्रपूरयिष्यते तथा चतुर्दशदिनाङ्के नामाङ्कनप्रपत्राणां निरीक्षणं भविष्यति। मतदानम् अस्मिन् जुलाईमासे त्रिंशत्-दिनाङ्के भविष्यति।

अधिसूचना श्वः प्रख्यापयिष्यते, तत्रैव नामाङ्कनपत्रं प्रपूरणार्थम् अन्तिमतिथिः अस्य जुलाईमासस्य चतुर्दशदिनाङ्कं यावत् वर्तते। नामाङ्कनपत्राणां निरीक्षणं पञ्चदशदिनाङ्के भविष्यति। मतदानम् अस्मिन् जुलाईमासे चतुर्विंशतिदिनाङ्के तथा मतगणना अपि तस्मिन्नेव दिवसे भविष्यति।

**ऋतु विभाग – HL-5**

भारतर्तु-विज्ञान-विभागेन उक्तं यत् आगामिषु त्रिषु दिनेषु नैर्ऋत्य-प्रावृषे उत्तर-अरबसागर, गुजरात इत्येतयोः अन्येषु केषुचित् भागेषु तत्रैव हरियाणा, पञ्जाब राजस्थान इत्येतेषां शेषभागेषु अग्रे गन्तुं स्थितिः अनुकूला अस्ति। अद्य तटीय-कर्नाटकस्य, गुजरातस्य, कोङ्कणस्य, गोवाराज्यस्य, मध्यमहाराष्ट्रस्य च केषुचित् भागेषु प्रचण्डवृष्टिः भविष्यति इति ऋतु-विभागेन पूर्वानुमानितम्।

**क्रिकेट् HL-6**

पुरुष क्रिकेट् प्रतिस्पर्धायाम्, अद्य रात्रौ नॉटिंघम इत्यस्य ट्रेंट ब्रिज इत्यत्र पञ्च स्पर्धानां शृङ्खलायाः तृतीये विंशति प्रतिविंशति अन्ताराष्ट्रिय द्वन्द्वे भारतदलम् इङ्ग्लैण्डदलं सम्मुखीकरिष्यति। स्पर्धा भारतीयसमयानुसारं रात्रौ दशवादने प्रारप्स्यते।

**॥ इति वार्ता: ॥**